दिनाङ्क :- 25.02.2026

प्रात: - 06:55

<u>वैष्णव मंत्रिमंडल</u>

केन्द्रीयमन्त्रिमण्डलेन ह्यः सेवा-तीर्थं संवेदनशीलं, उत्तरदायीं, नागरिककेन्द्रितं च शासनस्य वैश्विकोदाहरणं कर्तुं प्रतिबद्धता पुनरुद्घाटिता। मंत्रिमंडलीयसभायाः अनन्तरं नवदिल्ल्यां प्रसारमाध्यमैः सह वार्तालापं कुर्वन् सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः सूचितवान् यत् मन्त्रिमण्डलेन केरल-राज्यस्य नाम केरलम् इति कर्तुं स्वीकृतिः प्रदत्ता।

आर्थिककार्याणां मन्त्रिमडलीय सभा-समित्या महाराष्ट्र, मध्यप्रदेश, बिहार, झारखण्ड राज्यानां च अष्टमण्डलेषु तिस्रः बहुविध-रेल-परियोजनाः अनुमोदिता। परियोजनानां कुल-प्राक्कलित-व्ययः द्वि सप्तत्यधिक नवसहस्र कोटिरूप्यकाणि अस्ति तथा च त्रिंशोत्तर द्विसहस्र एकत्रिंशोत्तर द्विसहस्र वा वर्षं पर्यन्तं पूर्णं भविष्यति। श्री वैष्णवः अवदत् यत्, गोंदिया-जबलपुर-रेलमार्गस्य द्विगुणीकरणं, बिहारस्य पुनारख-किउल-नगरयोः मध्ये तृतीय-चतुर्थ-मार्गयोः संयोजनं, झारखण्ड-राज्यस्य गम्हरिया-चण्डिल्-नगरयोः मध्ये तृतीय-चतुर्थ-मार्गयोः अपि संयोजनादि परियोजनाः सम्मिलिताः सन्ति। गुजरात-मेट्रो-रेल्-कार्पोरेशन्-लिमिटेड् इत्यस्य गिफ्ट्-नगरात् शाहपुर पर्यन्तं विद्यमानस्य उत्तर-दक्षिण-मार्गस्य विस्ताराय अपि मन्त्रिमण्डलेन अनुमतिः प्रदत्ता।

<u>प्रधानमन्त्री इस्राईल यात्रा</u>

प्रधानमन्त्री नरेन्द्रमोदी द्विदिवसीय यात्रायां इस्रेल्-देशं प्रति गम्यमानः अस्ति। प्रधानमन्त्रिणः इदं द्वितीयं इस्रेल-देशस्य यात्रा भविष्यति। भ्रमणकाले प्रधानमन्त्री इस्राईल-देशस्य समकक्षीयेन बेञ्जामिन् नेतन्याहु-वर्येण सह मिलयिष्यति। विदेशमन्त्रालयः अवदत् यत्, उभौ भारत-इस्राईल-सामरिकसहभागित्वेन कृतस्य महत्त्वपूर्णस्य प्रगतिः समीक्षितुं शक्नुतः। विज्ञान-प्रौद्योगिकी, नवान्वेषणम्, रक्षा-सुरक्षा, कृषिः, जल-प्रबन्धनम्, व्यापार-अर्थव्यवस्था इत्यादिषु विविधक्षेत्रेषु सहकारस्य अवसराणां विषये अपि तौ चर्चां करिष्यतः ।

<u>राष्ट्रपति - महाराष्ट्र</u>

राष्ट्रपतिः द्रौपदी मुर्मुः महाराष्ट्रस्य द्विदिवसीययात्रायैः ह्यः अपराह्णे मुम्बई नगरं संप्राप्तवती। मुम्बई-नगरस्य छत्रपति-शिवाजी-महाराज्-अन्ताराष्ट्रिय-विमानस्थानके राज्यपालेन आचार्यदेवव्रतेन तस्याः स्वागतम् विहितम्। मुख्यमन्त्री देवेन्द्र फड्नविसः, उपमुख्यमन्त्री एकनाथशिन्दे, सुनेत्रा अजित पवारः च अपि उपस्थिताः आसन्। राष्ट्रपतिः लोकभवने पी. डी. हिन्दुजा चिकित्सालये आयोजिते 'सेविङ्ग लाईव्स ऐंड बिल्डिङ्ग अ हेल्दियर भारत्' इत्येतस्य राष्ट्रव्यापि-अभियानं उद्घाटितवती।

उपराष्ट्रपति-जम्मू-कश्मीर

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः अद्यारभ्य द्वि-दिवसीय-यात्रायाम् जम्मू-कश्मीर्-प्रदेशं गमिष्यति। प्रथमयात्रायाम् उपराष्ट्रपतिः श्वः श्रीनगरनगरस्थे काश्मीरविश्वविद्यालयस्य दीक्षान्तसमारोहे मुख्यातिथिरूपेण उपस्थास्यति।

जे. पी. नड्डा

स्वास्थ्य-परिवार-कल्याण-मन्त्री जगत्-प्रकाश्-नड्डाः, गाज़ियाबाद्-नगरस्य यशोदा-मेडिसिटी इत्यत्र ए. आई.-सक्षमस्य ई-आई. सी. यू. कमाण्ड्-केन्द्रस्य उद्घाटनम् अकरोत् मण्डल-चिकित्सालय-स्तरे क्रिटिकल्-केयर्-सेवां सुदृढं कर्तुं उपक्रमः अपेक्षितः अस्ति। जनसमूहं सम्बोधयन् श्री. नड्डाः अवदत् यत् ए. आई.-सक्षम-स्वास्थ्यसेवा समयोचित-हस्तक्षेपं, निदानस्य परिशुद्धतां, वास्तविक-समय-निरीक्षणं च सुनिश्चितं करोति। सः अवदत् यत्, सम्पूर्णे देशे एकाशीति दशमलवोत्तर एक लक्षतोप्यधिकानि आयुष्मान-आरोग्य-मन्दिराणि कार्यान्वितानि सन्ति।

क्रिकेट

आई सी सी पुरुषाणां विंशति-प्रतिविंशति क्रिकेट्-विश्वचषक-क्रीडायां इङ्गलैण्ड्-दलेन गतसायं श्रीलङ्कादेशस्य पाल्लेकेले-अन्ताराष्ट्रिय-क्रिकेट्-क्रीडाङ्गणे द्वितीयायां समुत्कृष्ट-अष्ट-स्पर्धायां पाकिस्तानदलं द्वाभ्यां स्तोभाभ्यां पराजितम्।

।। इति वार्ताः।।